भाति मौरीशसम्

(संस्कृतकाव्यम्)

प्रणेता

रमाकान्त शुक्लः

Rs. 10.00

१९८४

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली—११००५९

भाति मौरीशसम्

(लेखक : डा० रमाकान्त शुक्लः)

(१)

भारताम्भोधिमुक्ताफलं भास्वरं,
पूर्वरूपं पृथिव्यां दिव सुन्दरम् ।
भारतं रूपमेवापरं धारयत्
भाति मौरीशसं भाति मौरीशसम् ।।

(२)

इक्षुमाधुर्यपूर्णं, प्रकृत्या प्रियं
कल्पनाकौशलं, पर्वतश्रीयुतम् ।
श्यामशस्यावृतं पुष्पाहासान्वितं
भाति मौरीशसं भाति मौरीशसम् ।।

(३)

वेशभूषाशनोपासनापद्धति-
क्रीडनामोदसंस्कारवृत्त्यादिषु ।
यद्धि भिन्नं सदप्यस्त्यभिन्नं हि तत्
भाति मौरीशसं भाति मौरीशसम् ।।

(४)

वेदभाभासितं सत्कलालासितं
रम्यसंगीतसाहित्यसौहित्यभू ।
भारतीवल्लकीझङ्कृतैर्झङ्कृतं
भाति मौरीशसं भाति मौरीशसम् ॥

(५)

संस्कृतं गुर्जरीं तामिलं तेलगुं
भोजपूरीं क्रियोलं महाराष्ट्रिकाम् ।
फ्रेञ्चहिन्द्यांग्लभाषाश्च नित्यं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

(६)

होलिका-दशहरा-पर्वकोजागरी-
पोङ्गल - श्रावणी - दीपमालामयम् ।
ईद-वैशाखि-क्रुसमस् - युगादीन् दधत्
भाति मौरीशसं भाति मौरीशसम् ॥

(७)

शङ्करं शम्प्रदं माधवं राघवं
पार्वतीं राधिकां जानकीं च स्तुवत् ।
मारुतिं बुद्धदेवं जिनं च स्मरत्
भाति मौरीशसं भाति मौरीशसम् ॥

(८)

मन्दिरैर्मस्जिदैश्चैत्यगिर्जागृहै-
रार्यगेहैर्गुरुद्वारकैः राजितम् ।
कर्मभूः शर्मभूः धर्मभूः मर्मभूः
भाति मौरीशसं भाति मौरीशसम् ॥

(९)

राजमार्गेषु पुष्पप्रहासैर्युतम्
आम्र-लीची-लिली-ताल - शोभायुतम् ।
भास्करास्तोदयाभ्यां भृशं रञ्जितम्
भाति मौरीशसं भाति मौरीशसम् ॥

(१०)

सप्तवर्णां धरित्रीं विचित्रां दधत्
इन्द्रचापप्रभाभिर्भृशं रञ्जितम् ।
रम्यमन्तूरियम् पुष्पहासैर्युतम्
भाति मौरीशसं भाति मौरीशसम् ॥

(११)

यत्र नानार्तव सन्ति दृश्याः सदा
यस्य चेतोहरं रम्यरूपं तथा ।
हिन्दपाथोधिरङ्गत्तरङ्गार्चितं
भाति मौरीशसं भाति मौरीशसम् ॥

(१२)

मोक्षदांगुष्ठलम्बैर्नगै शोभितम्
अङ्गरक्षाद्रि-मुण्डाद्रि - सम्पालितम् ।
निर्झराणां रवैः स्वीयवृत्तं वदत्
भाति मौरीशसं भाति मौरीशसम् ॥

(१३)

क्वापि यात्रिद्रुमैः क्वापि चिञ्चाद्रुमैः
क्वाप्यनन्नास - सत्क्षेत्रकैर्मोदितम् ।
क्वापि लोंगान-चीनामृतै स्वादु सत्
भाति मौरीशसं भाति मौरीशसम् ॥

(१४)

आतिथेयो भवेत् शीघ्रमभ्यागतो
यत्र कैश्चित्क्षणैरेव दूरागतः ।
शान्तिदं धर्मपीयूषपूरप्लुतं
भाति मौरीशसं भाति मौरीशसम् ॥

(१५)

लोकनृत्याञ्जितं लोककृत्यान्वितं
लोकगाथांकितं लोकगीतान्वितम् ।
रागरङ्गोत्सवैर्मण्डितं वर्धितं
भाति मौरीशसं भाति मौरीशसम् ॥

(१६)

यस्य संदृश्य संदृश्य शोभा नवाः
यस्य संस्मृत्य संस्मृत्य नाना कथाः ।
रोमहर्षो नृणां जायते तत्प्रियं
भाति मौरीशसं भाति मौरीशसम् ।।

(१७)

'विजिनी-पाल'-गाथाङ्कितं कोमलं
चित्तविश्रामभूमिः कवीनां प्रिया ।
सर्पदंशैर्विहीनं मधुप्लावितं
भाति मौरीशसं भाति मौरीशसम् ।।

(१८)

"हन्त ! डोडोतपस्वी खलैर्नाशितः"
इत्थमाक्रुद्ध्य यत्र प्रकृत्या भृशम् ।
चक्रवातक्रमेणेव निःश्वस्यते
तत्प्रकृत्या गृहं भाति मौरीशसम् ।।

(१९)

सांस्कृतं मेलनं योजयित्वाखिलान्
विज्ञधुर्यान् नयज्ञाँस्तथा धार्मिकान्।
गान्धिसंस्थान - प्रेक्षागृहे दर्शयत्
भाति मौरीशसं भाति मौरीशसम् ॥

(२०)

हे रमाकान्त ! पश्यात्र दामोदरं
वासुदेवं हि विष्णुं दयालुं हरिम्।
लक्ष्मणं रामयुक्तं सुरेशं शिवं
नागराजं रवीन्द्रानिरुद्धारुणान्।

(२१)

भो रमाकान्त ! पश्यात्र गेहे सताम्
मारुतेर्वैजयन्तीं लसन्तीं शुभाम्।
पश्य ! विस्मृत्य पीडामतीतां निजां
भाति मौरीशसं भाति मौरीशसम् ॥

(२२)

यस्य गङ्गातटाके शिवं शङ्करं
पूजयित्वा लभन्ते सुखं सज्जनाः ।
'स्वस्तिका'-होलिका-रागपूर्णं हि तत्
भाति मौरीशसं भाति मौरीशसम् ।।

(२३)

होलिका श्रीमतां जीवनं पूरयेत्
सौख्य-शोभा-समुल्लासभावैस्सदा ।
सेचितं प्रेमरागेण चोल्लासितं
भातु मौरीशसं भातु मौरीशसम् ।।

(२४)

हर्षमुल्लासमोजो दधाना सदा
रत्नगर्भा धरेयं सदा राजताम् ।
शारदा - श्रीसपर्यापरं सत्सदा
भातु मौरीशसं भातु मौरीशसम् ।।

●

(रचनातिथि : १७-३-१९८४ ई० । रचनास्थानम् : मौरीशसम्)

ग्रन्थकारः

नाम	: रमाकान्त शुक्लः
जन्मतिथिः	: २४.१२.१९४०
जन्मस्थानम्	: खुर्जा (उ० प्र०)
शिक्षा	: एम० ए० (हिन्दी–संस्कृतयोः) पीएच० डी०, साहित्याचार्यः, सांख्ययोगाचार्यः
प्रकाशिताः ग्रन्थाः	: जैनाचार्य रविषेणकृत 'पद्मपुराण' और तुलसीकृत 'रामचरितमानस' (१९७४), भाति मे भारतम् (१९८०), जय भारतभूमे ! (१९८१) अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (खण्डत्रयात्मकः) (१९८०-१९८२),
आवास–संकेतः	: आर–६, वाणी विहारः, नयी दिल्ली-११००५९